**अमुष्यपुत्र** पु० ६त०नि०अलुक्। प्रख्यातवंशे कुलीने तस्य भावः मनोज्ञा० वुञ् आमुष्यकम्। कौलीन्ये न०।

**अ(आ)मुष्यायण** पु० अमुष्य अपत्यम् फ (फञ्) अलुक्। विख्यातकुलोत्पन्ने अपत्ये अमुष्यापत्ये च।

**अमूदृच्** त्रि० अमुष्येव दर्शनमस्य अदस्+दृश—क्स आति उत्त्वमत्वे। अदःशब्दार्थसदृशे। कञ्। अमूदृशः क्विन् अमूदृक् कुत्वम्। उक्तार्थे। कञ् प्रत्यये स्त्रियां ङीप् "अमूदृशी तत्कविहन्दवन्दिता" नै०।

**अमूर** स्त्री अमूः मूर्च्छाभावः कुञ्जा० अस्त्यर्थे र। मूढभिन्ने मोहशून्ये "संजानत स्वैर्दक्षैरमूराः" ऋ० १ ६८'४, "यास्कस्तु मूढा वयं स्मोऽमूढस्त्वमसि इति" मूढशब्दस्य रूपमाह तत्र पृ० साधुत्वम्।

**अमूर्त्त** त्रि० न०त०। मूर्त्तभिन्ने अवयवशून्ये अपरिच्छिन्नपरिमाणे "क्षितिर्ज्जलं तथा तेजः पवनोमन एव च। परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी" भाषा० "मूर्त्तत्वमवच्छिन्नपरिमाणवत्त्वमिति" सि०मुक्ता० तद्धीने गगनादौ। "द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चामूर्त्तमेव च" शत०ब्रा०।

**अमूर्त्तगुण** पु० ६त०। वैशेषिकोक्ते अमूर्त्ताकाशादेर्गुणविशेषे "धर्म्माधर्म्मौ भावना च शब्दोबुद्ध्यादयोऽपि च एतेऽमूर्त्तगुणाः सर्व्वे" भाषा०।

**अमूर्त्ति** त्रि० नास्ति मूर्त्तिरस्य। १अवयवशून्ये गगनादौ २विष्णौ पु० "अमूर्त्तिरनघोऽचिन्त्यः" विष्णु स० "मूर्त्तिर्घनरूपं धारणसमर्थं चराचरलक्षणं तन्नास्ति यस्य" भा०।

**अमूर्त्तिमत्** त्रि० न०त०। १मूर्त्तिमद्भिन्ने गगनादौ २विष्णौ पु० "दीप्तमूर्त्तिरमूर्त्तिमान्" वि०स०।

**अमूल** त्रि० नास्ति मूलं यस्य। १ आदिकारणशून्ये "मूले मूलाभावादमूलम्" सा०सू०। "त्रयोविंशतत्त्वानां मूलमुपादानं प्रधानं अमूलं मूलशून्यं अनवस्थापत्त्या तत्र मूलान्तरासम्भवात्" प्र०भ०। "इयं वा इदं जीवनं "मूलि चैवामूलञ्च तदुभयं देवानां यन्मनुष्याः उपजीवन्ति पशवोऽमूलाः ओषधयोमूलिन्यः" शत० ब्रा०। मूलि च अमूलञ्चान्नाद्यं प्रतिष्ठितम्" शत०ब्रा०। २ मूलवृक्षादिशिफा तच्छून्ये त्रि० मूलान्नञ्"। पा० अजादि टाप्। सा च ३ अग्निशिखावृक्षे। कप्। अमूलकोऽप्युक्तार्थे मूलग्रन्थेषु—अदृष्टे च "एतद्वचनममूलकम्" भूरिलोकप्रसिद्धिः।

**अमृक्त** त्रि० मृज—शोधालङ्कारयोः वेदे न षत्वम् न०त०। १अशोधिते अनिर्णिक्ते "अमृक्तेन रुशता वाससा" भ० ऋ० ६,६६,५ लोके तु अमृष्टः। तत्रार्थे धातूनामनेकार्थत्वात् २अहिंसिते। "रथोवाजा ऋभुक्षणो अमृक्ताः" ऋ०७,३७,१। "अमृक्ताः अहिंसिताः" भा०।

**अमृणाल** स० सादृश्ये न०त०। मृणालसदृशे वीरणमूले।

**अमृत** त्रि० न मृतः। १मरणशून्ये जीविते "अमृते जारजः कुण्डः" अमरः "अपाम सोममृता अभूम" इति श्रुतिः मरणञ्चात्र "आभूतसंप्लवस्थानममृतत्वं हि भाष्यते इति" विष्णु पु० उक्तम् महाकल्पावस्थायित्वं, देवानामपि तथैवामृतत्वम् "कार्य्यात्यये तदध्यक्षेण सहातः परमाम्नायात्" शा०सू० कार्य्यब्रह्मणा सह सर्व्वेषां लयाभिधानात्। न मृतं मरणं यस्मात्। २पीयूषे तत्सेवने हि अमृतत्वं भारतादौ प्रसिद्धम्। तच्च प्रथमं पृथूपदिष्टै र्देवैरिन्द्रं वत्सं कृत्वा गोरूपधरायाः पृथ्व्या दुग्धम् पश्चाच्च दुर्वासःशापात् समुद्रमध्यं गतम् ततो देवासुरैः समुद्रे मथिते पुनरुत्पन्नमिति पौराणिकी कथानुसन्धेया "देवासुरैरमृतमम्बुनिधिर्ममन्थे" किरा० न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" छा०उ०। "अमृतदीधितिरेष विदर्भजे। भजसि तापमनुष्णकिमंशुभिः। यदि भवन्ति मृताः सखि! चन्द्रिकाः इति" नैषधम्। ३ जले तस्य प्राणहेतुत्वात् अमृतत्वम्। "अन्नमयं हि सौम्य! मन आपोमयः प्राणः" इत्युपक्रम्य षोड़शकलः सौम्य! पुरुषः पञ्चदशाहानि माशीः काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यते" छा०उ०। जलपानाभावे प्राणविच्छेदोक्तेः तत्पाने च प्राणवृद्धेः जलस्य मरणाहेतुत्वम्। "अमृतोपस्तरणमसि स्वाहा" "अमृतापिधानमसि स्वाहेति" आपोशनमन्त्रः। ४ घृते तस्य, "आयुर्वै घृत" मित्युक्तेरायुर्जनकत्वात् मरणाहेतुत्वात्तथात्वम्। "अमृतं नाम यत् सन्तोमन्त्रजिह्वेषु जुह्वति। शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना" माघः। ५पारदे तस्य च रसायनादिना पाने "अभ्रकस्तव वीजन्तु मम वीजन्तु पारदः अनयोर्मेलनं देवि! मृत्युदारिद्र्यनाशनम्" इत्युक्तेः बहुकालजीवनहेतुत्वात् तथात्वम् रसेश्वरदर्शने विवरणम्। ६यज्ञशिष्टे द्रव्ये "यज्ञशेषोऽमृतं स्मृत" मित्युक्तेस्तथात्वम्। ७ अयाचिते वस्तुनि "मृतं स्याद्याचितं भैक्ष्यममृतं स्यादयाचितम्" मनूक्तेस्तस्य मरणरूपापमानहेतुयाचनशून्यत्वात् तथात्वम्। "ऋतामृताभ्यां जीवेत" मनुः। ८दुग्धे तस्य देहधारकत्वेन मरणाहेतुत्वात् तथात्वम्। ९अन्ने "अन्नमूलं हि जीवन" मित्युक्तेस्तथात्वम्। न म्रियते क्षीयते। १०स्वर्णे।